# षष्ठः पाठः

BUW8BL

# बुद्धिबलम्



एकस्मिन् वने एकः सिंहः आसीत्।

स प्रतिदिनं पशूनां वधं करोति स्म।

एकदा एकस्य शशकस्य वारः आयातः।

सः विलम्बेन सिंहस्य समीपम् अगच्छत्।

विलम्बात् सिंहः क्रुद्धः अभवत्, विलम्बस्य च कारणम् अपृच्छत्।

शशकः अवदत्, अन्यः सिंहः मार्गे तस्य अवरोधम् अकरोत्।

क्रुद्धः सिंहः शशकेन सह अन्यं सिंहं द्रष्टुम् अगच्छत्।

शशकः तम् एकस्य कूपस्य समीपम् अनयत्।

सिंहः अपृच्छत्, "कुत्र अन्यः सिंहः?"

बुद्धिमान् शशकः अवदत्, "सः कूपे अस्ति।"

यदा सिंह: कूपे स्वप्रतिबिम्बम् अपश्यत् तदा स: कूपे अकूर्दत् मृत: च।

अत: साधूक्तम्- ‘‘बुद्धिर्यस्य बलं तस्य।’’

**अभ्यासः**

**मौखिकः**

१ .उपर्युक्त कहानी को अपने शब्दों में सुनाइए।

**लिखितः**

२ .निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए-

क. ंिसंह: कुत्र आसीत्?

ख. सिंह: किम् अकरोत्?

ग. शशक: विलम्बस्य किं कारणम् अवदत्?

घ.शशक: सिंहं कुत्र अनयत्?

३ .संस्कृत में अनुवाद कीजिए-

(क)बालक पढ़ता है।

(ख)वह खाता है।

(ग)वे हँसते हैं।

(घ)राधा खेलती है।

**शब्दार्थाः**

वार:-बारी, आयात: - आयी, अवरोधम्-रुकावट, कूपस्य - कुएँ के, प्रतिबिम्बं-परछाई को, अकूर्दत्-कूद गया, साधूक्तम् (साधु+उक्तम्) - ठीक कहा गया है।